# Ishvara Stotram Athava Surastavanam

# ईश्वरस्तोत्रं अथवा सुरस्तवनम्

## Document Information

Text title : Ishvara Stotram or Surastavanam

File name : Ishvarastotram.itx

Category : shiva

Location : doc_shiva

Transliterated by : staff of Muktabodha.org Mark S.G. Dyczkowski

Proofread by : Aruna Narayanan narayanan.aruna at gmail.com

Description/comments : rudrayAmale uttaratantre 2 bhairava bhairavI sa.nvAde

Source : Rudrayamalam part 2 edited by Ram Prasad Tripathi and Sudhakar Malaviya

Acknowledge-Permission: Marjorie Woollacott, Ph.D., Digital Library Coordinator muktabodha.org

Latest update : February 16, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 16, 2020

*sanskritdocuments.org*

# ईश्वरस्तोत्रं अथवा सुरस्तवनम्

अथ षष्टितमः पटलः
आनन्दभैरव उवाच
वद कान्ते परानन्दे रहस्यं कुलसुन्दरि ।
यस्य विज्ञानमात्रेण भवेद् गङ्गाधरो हरिः ॥ ६०-१॥

ईश्वरस्य स्तवब्रह्मपरं निर्वाणसाधनम् ।
शोभाकोटियोगपतेर्योगेन्द्रस्य परापतेः ॥ ६०-२॥

ईश्वरं के न मानन्ति ब्रह्मविष्णुशिवादयः ।
तस्य स्मरणमात्रेण महावाग्मी च मृत्युजित् ॥ ६०-३॥

मन्त्री वेदान्तसिद्धान्तं तं भजन्ति महर्षयः ।
देवा मनुष्या गन्धर्वास्तं भजन्ति महेश्वरम् ॥ ६०-४॥

अकालमृत्युहरणं सर्वदा सर्वतोमुखम् ।
सदा तस्य स्तवं दिव्यं श्रोतुमिच्छामि शाङ्करि ॥ ६०-५॥

सुरस्तवनं
श्रीआनन्दभैरवी उवाच
कौल त्वं शृणु शङ्करप्रियकरं स्तोत्रं तदीशस्य च
श्रीनाथाय नमः कुलेश परमप्राणेश तुभ्यं मुदा ।
सानन्दाय नमो भवाय पतये लोकेश्वरायो ॐ नमो
भूतेशाय गणाधिपाय यतये श्रीशूलिने ते नमः ॥ ६०-६॥

कान्ताय प्रणवाय योगपतये योगेश्वरायो ॐ नमो
महारायाक्षरेश्वराय महते नित्याय नित्यं नमः ।
स्वाधिष्ठानविभेदकाय हरये मूलाब्जसम्भेदिने ।
नाभेरम्बुजभेदिने हृदयाम्भोद्भिदकायों नमः ॥ ६०-७॥

कालाय प्रणवाय मायवशिने नित्यं नमो भास्वते

मोक्षाय प्रमथेश्वराय कवये खट्वाङ्गहस्ताय ते ।
भक्तिश्रीनिधये महेन्द्रखचराय मायाश्रयायों नमो ।
विज्ञानाय शिवाय सूक्ष्मगतये गूढाय भूयो नमः ॥ ६०-८॥

सर्वज्ञाय जयाय भूतिपतये भूतेश्वराय प्रभो
पञ्चास्याय हराय देवपतये गौरीश्वराय श्रिये ।
भोगायान्तरगामिने हरिहरायानन्दचिद्रूपिणे
कल्याणाय भगाय शुद्धमतिभिर्नित्यं नमस्ते नमः ॥ ६०-९॥

गोविन्दप्रियवल्लभाय विधये ब्रह्मादिकोत्पत्तये
उत्पत्तिस्थितिसंहृतिप्रकृतये बाह्याय विश्वेश्वर ।
तुभ्यं काल नमो नमः प्रलययोगोल्लासिने भूभृते
विज्ञाताय गिरीन्द्रपूजित विभो भूताधिपायानिशम् ॥ ६०-१०॥

गौरीशाय गणार्चिताय मनसे मान्याय भूवासिने
भूतोत्साहमहीशनाथशशिचूडाय प्रधानाय ते ।
नित्यं नित्यकलाकुलाय फणिचूडाय प्रबुद्धाय ते
तेजःशान्तिपते सतां पतिपते निर्वासमे ते नमः ॥ ६०-११॥

शोभाकोटियुताय चन्द्रकिरणाह्लादाय सूक्ष्माय ते
तुभ्यं नाथ नमो नमः प्रणमतामानन्दसिन्धूत्सवा ।
हेरम्ब श्रयकार्तिकेयजनकानन्दप्रियाय प्रभो
पित्रे सर्वसुखाय सर्वपतये श्रीनीलकण्ठेश्वर ॥ ६०-१२॥

त्रिब्रह्मार्पितभूतये सुरतये श्रीभास्वते योगिना-
मानन्दोदयकारिणे कुलपते ते नाथ तुभ्यं नमः ।
ब्रह्मानन्दकुलाय रौप्यगिरये सौन्दर्यसंसिद्धये
सर्वानन्दकराय सम्परतरायाढ्याय सत्यं नमः ॥ ६०-१३॥

काशीशं कौशिकीशं सुरतरुकिरणं कारणाख्यं सुखाख्यं
गौरीशं गङ्गिरीशं गुरुमगुरुगिरिश्रेणिलिप्ताङ्गवङ्गम् ।
घोषाख्यं मञ्जुघोषं घनगणघटितं घोरसङ्घट्टनादं
चार्वीशं राघवेशं घनहृदि घटमामीश्वरं घौटकेशम् ॥ ६०-१४॥

लाक्षाभाण्डं विशालो वसति तव करे स्थावरो जङ्गमो वा
भूताध्यक्षो वशिष्ठः स्वपरिजनकुले सर्वदा पाहि शम्भो ।
भक्तिज्ञानं न दातुं चपलमलमणिश्रेणिमाला विलोला

लोकाभीतो कलङ्की विधिशतमुकुटश्रीपदाम्भोरुहं ते ॥ ६०-१५॥

धूर्तः शौरिः प्रशान्तो विमलमधुरसामोदमानोऽप्रमत्तो
मायामोहापदेवी सुरमदमदनो दानसम्मानदाता ।
त्वं नाथं श्रीपदाम्भोरुहविमलतले ते कथं ना सुरक्षे
पूर्वास्यो दक्षिणास्यो धनपतिवदनः पश्चिमास्यो मुनिस्त्वम् ॥ ६०-१६॥

भेदी सिद्धान्तविद्याधरनिधिकिरणः कारणोऽनन्तशक्ति-
र्यः साक्षात् कामधेनुः स च धनपतिपः सर्वभोगानुरागी ।
पादाम्भोजे हि नित्यं कलगिरिसुतानाथ ते योगिपत्वम् ।
चित्तं मे चञ्चलाख्यं शशिधरकिरणो वाक्पते योगसिद्धिः ॥ ६०-१७॥

कपर्दी श्रीखड्गासिवरगदया वेदभुजया
घनच्छायासङ्कोचरचनावशच्छद्मविजयः ।
जयी जेता जायेर्जयमनुकरोतु श्रियतमो
ज्वलज्झञ्झावाते क्षणधर इह क्रोध इति मे ॥ ६०-१८॥

अथाऽऽज्ञा चक्रान्तर्गतविवरमाच्छन्नजटिलः
प्रतिज्ञाभङ्गस्थकटकशतकोटिप्रकटितः ।
कुठारस्ते क्रोधी कमठकटवासी कठिनहा
ककाराद्यं नत्वा दशकिरणमानोऽवतु सदा ॥ ६०-१९॥

सुधाखण्डादेव्याः स्तवनपठनेन प्रियकरं
पदाम्भोजं चेति प्रचयति स्वभाग्यं कुलपते ।
प्रधाने भूखण्डे जयति यदि मृत्युञ्जयपदं
विनोदं भूयोगं पचति सहसा प्रेमतरलः ॥ ६०-२०॥

यद्येवं प्रपठेदिदमनियतं कौलावलीसंयुतं
स्तोत्रं साररहस्यभारपरमानन्दैकचित्तस्थलम् ।
योगीन्द्रावगतित्वमुक्तफलदं सर्वेश्वरत्वं पदं
चन्द्रादित्यसमागतं परपदाह्लादैकमात्रं लभेत् ॥ ६०-२१॥

ते शम्भो यदि पादाम्भोरुहमङ्गलवल्लिका ।
पूज्यते सर्वदा योगी निर्वाणगुणसिद्धये ॥ ६०-२२॥

किन्न सिध्यति भ्रूमध्ये शिवभक्तिप्रसादतः ॥ ६०-२३॥

इति श्री रुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने अनाहत पद्मे सुरस्तवनं

नाम षष्टितमः पटलः ॥ ६०॥

The numbers correspond to paTala and verse numbers from Rudrayamala uttaratantra.

Proofread by Aruna Narayanan

---

*Ishvara Stotram Athava Surastavanam*

pdf was typeset on February 16, 2020

Please send corrections to *sanskrit@cheerful.com*